<B1> ।।**श्रीः**।। निर्णयसागर प्रेस--बम्बईके संस्करण से पुनर्मुद्रित एवं प्रकाशित

श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यप्रणीता कारिकावली **न्यायमुक्तावलीसंवलिता** दिनकरी--रामरुद्धीव्याख्योभ्यां **च सनाथीकृता**

इयं तत्त्वज्ञानमन्दिरे न्यायवेदान्ताध्यापकेन जेरे इत्युपाढद्धठुड़१४;व- नारायणसूनुना आत्मारामशर्मणा **टिप्पणादिभिः परिष्कृत्य संशोधिता**

Reprinted and Published from The Edition of Nirnayasagar Press-Bombay

KARIKAVALI OF VISWANATHA NYAYAPANCHANANA BHATTACHARYA WITH THE COMMENTARIES MUKTA VALI, DINAKARI, RAMARUDRI

EDITED WITH FOOT-NOTES Etc. BY ATMARAM NARAYAN JERE

भूमिकेयम्-- ---------- श्रीदत्तो विजयते। अयि महाशयाः! विदितमेवैचच्छ्रीमताम् यत्सकलप्राणिसमभिलषितायामात्यन्तिकदुःखनिवृत्तावात्मतत्तवसाक्षात्कारस्यैव साधन भावं प्रतिपादयन्ति "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादयः सकलप्रमाणमौलिभूताः श्रुतय इति। तत्र च दर्शनमनूद्य विहितेषु श्रवणमननिदध्यासनेष्वसंभावनादिसकलधीदोषनिरासफलकं मननमेवाभ्यर्हिततमम्। मननं चेदं सपरिकरैर्हेतुभिरनुमानमेव। तच्चेदमनुमानं यथा चिरन्तनैः कणादगौतमादिभिर्महर्षिभिर्नव्यैश्च गङ्गेशोपाध्यायप्रभृतिभिः कुशाग्रधिषणैर्व्युत्पादितं नैवमन्यैः कैश्चिदपि तन्त्रकारैरित्यत्रान्तरङ्गमेव विदुषां प्रमाणमिति न तदुपन्यासे प्रयोजनं किञ्चिदपि। अयमेव हि न्यायशास्त्रस्यास्य शास्त्रान्तरेभ्यो विशेषो यत्खलु सर्वविचारमूलभूतस्यानुमानयाथात्म्यस्य प्रकाशकत्वं नाम। नही तादृशमिह जगति किमपि तन्त्र नाम यदुताधिगतन्यायशास्त्रार्थयाथात्म्यः स्वकीययैव प्रज्ञया समालोचयतुं न शक्नुयात्। अत एवोक्तम्---'काणाद पाणिनीयं च सर्वशास्त्रोपकारक"मित्यनुभवसिद्धार्थबोधकं वचनं कैश्चित्। तत्र पाणिनीयं शास्त्रं पदज्ञानद्वारा यथा सर्वशास्त्रप्रविविक्षुमुपकरोति तथा कणादपदेन विवक्षित न्यायशास्त्रमपि पदार्थवाक्यार्थानुमानतत्त्वप्रबोधनद्वारा तमुपकरोतीति। तत्राप्यभ्यर्हिततया न्यायशास्त्रस्य श्लोकार्धे तद्वाचककाणादपदस्य प्रथमं प्रवेशः। तच्चेदं सर्वशास्त्रोपकारकं न्यायशास्त्रमनेकसूक्ष्मतरविचारप्रतपादकग्रन्थसंकलं महासागराय माणमालोक्य तत्र प्रबिविक्षणां स्थूलबुद्धीनां प्रवेशाय न्यायवैशेष्कशास्त्रपदार्थप्रतिपादनद्वारा प्रवेशयोग्यतापादकबुद्धिसौक्ष्म्यतामाधातुं राजीवतत्सदृशास्मदादिवशंवदः श्रीमान् विश्वनाथन्यायपञ्चाननभट्टाचार्यः संक्षेपतोऽनेकार्थाभिधायिनीं भाषापरिच्छेदापराभिधानां कारकावलीं प्रणिनाय। अस्याश्च बढद्धठुड़१४;वर्थसूचकाल्पपदयुततया सूत्ररूपतामनन्यसाधारणतां चाकलय्य तत एव स्वाभिमतसकलार्थप्रकाशनाय तद्भाष्यकल्पां मुक्तावल्यभिधानां तट्टीकामपि स्वयमेव निर्माय कारिकावल्याख्यसूत्रसहितां तां मुक्तावलीं "थत्करोषी"त्यादिभगवद्गीतावचनानुसारेण विष्णोर्वक्षसि समर्प्य शभाशुभफलं कर्मबन्धं विमुच्य च स कृतकृत्यो बभूव। मुक्तावली चेयं तत्त्वचन्तामण्यादृतया नवीनया विचारशैल्या पदार्थान् प्रतिपादयन्ती व्याख्यानमन्तरेण नैव मन्दमतीनामन्तेवासिनां तादृगुपकारायेत विचार्य भारद्वाजकुलाम्बुधिपूर्णचन्द्रो बालकृष्णभट्टात्मजः श्रीमान् महादेवभट्टस्तां व्याख्यातुमारेभे। परंतु नानेन सा संपूर्णतया व्याख्याता। किंतु शब्दखण्डड्डत्थ;न्तमेवेति तावत्पर्यन्तमेवोपलब्धया रामरुद्र्या वाराणस्यां प्रचलतया तादृश्या किंवदन्त्या चावगम्यते। मनोनिरुपणमारभ्याऽऽसमाप्ति पुनस्या व्याख्यानं महादेवभट्टात्मजो दिनकरभट्ट एव स्वपित्राज्ञानुसारेण चाकरेति "भानु प्रणम्य परिभाव्य च शास्त्रसार मुक्तावलीकिरण एष पिपृप्रदिष्टः। सद्युक्तिभिर्दिनकरेण करेण सोऽयं नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु" इति ग्रन्थान्ते परिदृश्यमानश्लोकात्"इति श्रीमहादेवभट्टतनूजदिनकरभट्टविरचिते" इतिवाक्याच्चावगम्यते। अतो "दिनकरभटटो दिनकरीं प्रणिनाय। अस्य

पिता बालकृष्णभट्ट" इति केषांचिद्वाक्यमाद्यन्तश्लोकानालोचनमूलकभ्रान्तजन्यमेवेति प्रतिभाति। अस्याश्च मुक्तावलीप्रकाशापराभिधानाया दिनकर्या अतिगूढार्थायाः काठिन्यमवलोक्य महापण्डितैः तेन रामरुद्रभट्टेन रामरुद्रीति स्वनामाङ्किता व्याख्या निरमायि। साचेय कारिकावली मुक्तावली-दिनकरी-रामरुद्रीसहिता पूर्वं निर्णयसागरयंत्रालये मुद्रिताऽपि शब्दखण्डस्थीयरामरुद्रीरहता शोधकाद्यनवधानादनाऽशुद्धिबहुला विद्यार्थिनामध्ययनाय नालं बभूवेति तामिमां त्रुटिं परिजिहीर्षु भिः शुद्धपुस्तकनिर्माणे बद्धपरिकरैः सकलमुद्रायत्रादर्शभूतनिर्णयसागरयंत्रालयाधिपतिभिर्वेदशास्त्रसंपन्नानां स्वकीयप्रधानपण्डितानां पणशीकरोपाढद्धडुड़१४;ववासुदेवशास्त्रिणामनुमत्या शुद्धपुस्तकनिर्माणरूपेऽस्मिन् कार्ये नियुक्तोऽहम्। मया च बालमनोरमामुद्राक्षरशालायां मुद्रितमेकं चौखम्बासंस्कृतसीरीजयंत्रे मुद्रितमपरं चेति पुस्तकद्वयं संगृह्य यावद्बुद्धिबलोदयं च सावधानतया समालोच्य शब्दखण्डस्थीयरामरुद्रीं चात्र निवेश्य प्रभादिटीकातः काश्चनात्यावश्यकीभूताष्टिप्पणिकाश्चात्र संयोज्यानुपयुक्ता भ्रामिकाश्च पूर्वपुस्तकस्थास्ता निष्कास्य महता परश्रमेण यथेदं पुस्तकं शुद्धं विद्यार्थिनामुपयोगि च स्यात्तथा प्रयतितम्। एवं कृतेऽप्यत्र मेऽनवधानतः सीसकाक्षरयोजकदोषेण वा मन्मतिमाद्यात्वा यदि किंचिदशुद्धमवशिष्टं समुपलभ्येत तदा तत्क्षन्तुमर्हन्त्येव गुणैकपक्षपातिनः सुधिय इति शिवम्। भवदीयः महामहोपाध्याय- श्रीमद्रामाचरणभट्टाचार्यचरणान्तेवासी--- आत्मारामशर्मा

विषयानुक्रमणिका विषयः पृष्ठं **१ प्रत्यक्षखण्डस्थम् १-२८३ मङ्गलवादः १ उद्देशग्रन्थः ४० मीमांसकमते शक्तिसादृश्यर्वपूपज्ञः ४८ शक्तिखण्डस्थनम् ५२ सादृश्यखण्डस्थनम् ५५ द्रव्यविभागः ६१ तमोविषयकपूर्वपक्षः ६७ तमःखण्डस्थनम् ६९ गुणविभागः ७२ कर्मविभागः ७३ सामान्यनिरूपणम् ७४ विशेषपदार्थनिरूपणम् ८० समवायनिरूपणम् ८५ अभावविभागः ९१ साधर्म्यनिरूपणम् १०१ कारणत्वनिरूपणम् १०७ अन्यथासिद्धिनिरूपणम् ११७ वैधर्म्यनिरूपणम् १३६ द्रव्येषु पृथिव्यादिप्रत्येकवृत्तिगुणानांपरिगणनम् १४० पृथिवीनिरूपणम् १४२ जलनिरूपणम् १६४ तेजोनिरूपणम् १७३ वायुनिरूपणम् १८३ आकाशनिरूपणम् १८९ कालनिरूपणम् १९८ दिङ्निरूपणम् २०३ आत्मनिरूपणम् २०४ प्रासङ्गकबुद्धिनिरूपणम् २३२ अनुभूतिविभागनिरूपणम् २३३ प्रत्यज्ञनिरूपणम् २४० अलौकिकप्रत्यज्ञनिरूपणम् २७२** २ अनुमानखण्डस्थम् २८४-२५० **अनुमितिवयुत्पादनम् २८४ परामर्शनिरूपणम् २८७ पूर्वपक्षव्याप्तिनिरूपणम् २९५ सिद्धान्तव्याप्तिनिरूपणम् २९७ पक्षतानिरूपणम् ३०८ हेत्वाभासनिरूपणम् ३१८** ३ उपमानखण्डस्थम् ३५१-३५५ उपमितिव्युत्पादनम् ३५१ **४ शब्दखण्डस्थम् ३५६-४३० शक्तिविचारः ३५६ लक्षणानिरूपणम् ३६६ आसत्तिनिरूपणम् ४०९ योग्यतानिरूपणम् ४१९ आकाङ्क्षातात्पर्यनिरूपणम् ४२३** ५ स्मृतिनिरूपणम्-४३१-४३२ **६ मनोनिरूपणम् ४३३-४३४** ७ गुणनिरूपणम् ४३५-५३९ मूर्तवृत्तित्वादभेदनिरूपणम् ४३७ रूपनिरूपणम् ४३६ रसनिरूपणम् ४४५ गन्धनिरूपणम् ४४९ स्पर्शनिरूपणम् ४४९ संख्यानिरूपणम् ४५० परिमाणनिरूपणम् ४६६ पृथक्त्वनिरूपणम् ४६८ संयोगनिरूपणम् ४७० विभागनिरूपणम् ४७१ परत्वापरत्वनिरूपणम् ४७४ बुद्धिनिरूपणम् ४७५ प्रामाण्यवचारनिरूपणम् ४८० व्याप्तिग्रहोपायनिरूपणम् ४९२ उपाधिविचारः ४९४ वैशेषिकमतखण्डस्थनम् ४९६ अनुमानविभागः ४९८ व्यतिरेकव्याप्तिनिरूपणम् ५०१ अर्थापत्त्यादीनामतिरिक्तप्रमाणतानिरासः ५०१ सुखनिरूपणम् ५०२ दःखनिरूपणम् ५०२ इच्छानिरूपणम् ५०३ द्वेषनिरूपणम् ५०६ प्रयत्ननिरूपणम् ५०६ गुरुत्वनिरूपणम् ५२७ द्रवत्वनिरूपणम् ५२७ स्नेहनिरूपणम् ५२९ संस्कारनिरूपणम् ५२९ धर्माधर्मनिरूपणम् ५३१ शब्दनिरूपणम् ५३७

<B1> श्रीः। **सिद्धान्तमुक्तावली।** ---------- **दिनकरी-रामरुद्रीभ्यां संवलिता।** प्रत्यक्षखण्डस्थम्। **चूडस्थामणीकृतविधुर्वलयीकृतवासुकिः। १** २ भवो भवतु भव्याय लीलाताण्डस्थवपण्डितः।। १ ।।

<B1> निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः। **१ विशदीकरवाणि २ कातुकान्नु राजीवदयावशंवदः।। २।।**

<B1> सद्रव्या गुणगुम्फिता सुकृतनां सत्कर्मणां ज्ञापिका **सत्सामान्यविशेषनित्यमिलताभावप्रकर्षोज्ज्वला।**

<B1> विष्णोर्वक्षसि विश्वनाथकृ१तिना सिद्धान्तमुक्तावली **विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम्।। ३।।**

<B1> नूतनजलधररुचये गोपवधू१टीदुकूलचौराय। **विघ्नविधाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति-- नूतनेति।**

<B1> ननु १ मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति

<B1> चेन्न। अविगीतशिष्टाचारविषयत्वेन मङ्गलस्यसपलत सिद्धे तत्र फलजिज्ञासायां संभवति दृष्टफलकत्वे अदृष्टफलकल्पनाया

<B1> नाया अन्या१य्यत्वात् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते।

<B1> इत्थंच यत्र मङ्गलं न दृश्यते तत्रापि जन्मातरीयं तत्कल्प्यते, यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्। प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे <B1> कारणत्वं विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु

<B1> मङ्गल्य विघ्नध्वंस एव लं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य

<B1> मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम्। इष्टापत्तेः, विघ्नशङ्कया तदाचरणात्। तथैव शिष्टाचारात्। नच तस्य निष्फलत्वे १तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम्। सति विघ्ने तन्नाशस्यैव

<B1> वेदबोधितत्वात्। अतएव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलं च विघ्नध्वंसविशेषे कारणम्। विघ्नध्वंसविशेषे च विनायकस्तवपाठादि;

<B1> क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थं च नास्तिकादीनां

<B1> ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धवितस्मै

<B1> कृष्णाय नमः संसारमहीरुहस्य बीजाय।।१।। घ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः।। संसारमहीरुहस्य बीजायेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः। एतेन ईश्वरे प्रमाणं दर्शितं भवति।

<B1> तथापि। यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि।

<B1> नच तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्त१त्कर्तृत्वेनेश्वरसिद्धिः।

<B1> नच शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यं, अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलस्तर्कः, 'द्यावाभूमी जनयन् देव एकः' 'विश्वस्य कर्ता भुवनस्य गोप्ता' इत्यादय आगमा अप्यनुसंधेयाः।। १।।

<B1> द्रव्यं गुणस्तथा कर्म सामान्यं सविशेष१कम्। **समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः।। २।।** पदार्थान्विभज२ते। ३द्रव्यमिति। ४अत्र सप्तमस्याभावत्वकथनादेव

<B1> ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्।

<B1> तथाहि, मण्यादिसमवहितेन वढिद्धठुड़१४;ननाा दाहो न जन्यते तच्छून्येन तु जन्यते तत्र मण्यादिना वढद्धठुड़१४;वौ दाहानुकूला शक्तिनाश्यते उत्तेजकेन मण्याद्यपसारणेन च <B1> **जन्यते इति कल्प्यते। एवं सादृश्यमप्यतिरिक्तः पदार्थः,**

<B1> तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्वात् यथा गोत्वं नित्यं तथाश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः।

<B1> नाप्यभावे, सत्त्वेन प्रतीयमानत्वादिति चेन्न। मण्याद्यभावविशिष्टवढद्धठुड़१४;न्यादेर्दाहादिकं

<B1> प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं

<B1> कल्पते, अनेनैव सामञ्जस्येऽनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात्।

<B1> नचोत्तेजके सति प्रतिबन्धकसद्भावेपि कथं

<B1> दाह इति वाच्यं, उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात्।

<B1> सादृश्यमपि न पदार्थन्तरं किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्, <B1> यथा चन्द्रभिन्नत्वे सति चन्द्रगताढद्धठुड़१४;लादकत्वादिमत्त्व मुखे चन्द्रसादृश्यमिति।। २।।

<B1> क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः। **द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम्।। ३।।** द्रव्याणि विभजते।। क्षितिः पृथिवी। आपो जलानि।

<B1> तेजो वढिद्धठुड़१४;नः। मरुद्वायुः। व्योम आकाशः। कालः समयः।

<B1> दिगाशा। देही आत्मा। मनः। एतानि नव द्रव्याणीत्यर्थः।

<B1> ननु द्रव्यत्वजातौ किं मानं नहि तत्र प्रत्यक्षं प्रमाणं घृतजतुप्रभृतिषु

<B1> तुप्रभृतिषु द्रव्यत्वाग्रहादति चेन्न। कार्यसमवायिकारणतावच्छेदकतया

<B1> संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया

<B1> द्रव्यत्वसिद्धेरिति। ननु दशमं द्रव्यं तमः कुतो

<B1> नोक्तं तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात्कर्मवत्त्वाच्च द्रव्यत्वम्। तद्धि गन्धशून्यत्वान्न पृथिवी, नीलरूपवत्त्वाच्च

<B1> न जलादिकं। तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न। आवश्यकतेजोभावेनैवोपपत्तौ द्रव्यान्तरकल्

पनाया <B1> अन्याय्यत्वात्। रूपवत्ताप्रतीतिस्तु भ्रमरूपा कर्मवत्ताप्रतीतिरप्यालोकापसारणौपाधिकी भ्रान्तिरेव। तमसोतिरिक्तद्रव्यत्वे

<B1> स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम्। **संयोगश्च विभागश्च परत्वं चापरत्वकम्।। ४।।** बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गरुत्वकम्। **द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च।। ५।।** अनन्तावयवादिकल पनागौरवं च स्यात्। सुवर्णस्य यथा तेजस्यन्तर्भावस्तथाग्रे वक्ष्यते।। ३।। गुणान्विभजते---अथ

<B1> उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा। प्रसारणं च गमनं कर्माण्येतानि पञ्च च।। ६।। **भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।** तिर्यग्गमनमप्यत्र गमनादेव लभ्यते।। ७।। **गुणा इति। एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्चशब्देन च दर्शिताः। तत्र गुणत्वजातिसिद्धिरग्रे** वक्ष्येते।। ४।। ५।। कर्माणि विभजते----उत्क्षेपणमिति। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि।। ननु

<B1> सामान्यं द्विविधं प्रोक्तं परं चापरमेव च। **द्रव्यादित्रिकवृत्तिस्तु सत्तवा परतयोच्यते।। ८।।** भ्रमणआदिकमपि पृथक्कर्म अधिकतया कुतो नोक्तमत आह---भ्रमणमिति।। ६।। ७।। सामान्यं निरूपयति---सामान्यमिति।

<B1> तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्तीत्यत उक्तं नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरमाणादीनामप्यस्तीत्यत उक्तमनेकेति। नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति। अतो वृत्तित्वसामान्यं विहाय समवेततः्वमुक्तम्। एकव्यक्तिमात्रवृत्तिस्तु न जातिः। तथाचोक्तम्। "व्यक्तेरभेदस्तुल्यत्वं

<B1> संकरोऽथानवस्थितिः। रूपहानिरसंबन्धो जातिबाधकसंग्रहः"।

<B1> १परत्वमधिकदेशवृत्तित्वमपरत्वमल्पदेशवृत्तित्वं,

<B1> सकलजात्यपेक्षया सत्ताया अधिकदेशवृत्तित्वात्परत्वं

<B1> तदपेक्षया चान्यासां जातीनामपरत्वम्। पृथिवीत्वाद्यपेक्षया

<B1> परभिन्ना तु या जातिः सैवापरतयोच्यते। **द्रव्यत्वादिकजातिस्तु परापरतयोच्यते।। १।।** व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च। **अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः।। १०।।**
द्रव्यत्वस्याधिकदेशवृत्तित्वाद्व्यापकत्वात्परत्वं सत्तापेक्षयाल्पदेशवृत्तित्वाद्व्याप्यत्वादपरत्वम्। तथाच धर्मद्वयसमावेशादुभयमविरुद्धम्।। ८।। ९।। विशेषं निरूपयति--अन्त्य इति। अन्तेऽवसाने वर्तत इति अन्त्यः। यदपेक्षया विशेषो नास्तीत्यर्थः।

<B1> घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं

<B1> भेदः परमाणूनां परस्परं भेदको विशेष एव स तु स्वत एव

<B1> घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। **तेषु जातेश्च संबन्धः समवायाः प्रकीर्तितः।। ११।।** व्यावृत्तस्तेन तत्र विशेषान्तरापेक्षा नास्तीत्यर्थः।। १०।।

<B1> समवायं१ दर्शयति---घटादीनामिति।। अवयवावयविनोर्जातिव्यक्त्योर्गुणिनोः

क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः संबन्धः स समवायः, समवायत्वं नित्यसंबन्धत्वम्।२

<B1> तत्र प्रमाणं तु १गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबन्धविषया २ विशिष्टबुद्धित्वाद्दण्डड्डत्थी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम्। ३ एतेन संयोगादिबाधात्समवायसिद्धिः। नच स्वरूपसंबन्धेन

<B1> सिद्धसाधनमर्थान्तरं वा अनन्तस्वरूपाणां संबन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः। नच समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः, तत्र रूपसमवायसत्वेपि रूपाभावात्। नचैवमभावस्यापि वैशिष्ट्यं संबन्धान्तरं सिद्ध्येदति वाच्यम्,

<B1> तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावस्य तत्र सत्वात् तसय च नित्यत्वात् अन्यथा देशान्तरेपि घटाभावप्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्वात्'

<B1> मम१ तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः, वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने नष्टत्वान्न तद्वत्ताबुद्धिः, वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम्। एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां

<B1> अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः। **प्रागभावस्तथा ध्वंसोपयत्यन्ताभाव एव च।। १२।।** संबन्धः।। ११।। अभावं विभजते----अभावस्त्विति। अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्।
संसर्गाभावान्योन्याबावभेदादित्यर्थः।

<B1> अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात् संसर्गाभावं विभजते---प्रागभाव इति।।
संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वं। अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वं।

<B1> एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते। **विनाश्यभावत्वं प्रागभावत्वम्। जन्याऽभावत्वं ध्वंसत्वम्। नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्। यत्र तु**

<B1> भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सं

<B1> बन्धाघटकत्वादत्यन्ताभावस्य नित्यत्वेपि घटकाले न घटात्यन्ताभावबुद्धिः।

<B1> तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां मतं, श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति घीश्च प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावं तयोर्विरोधात्। नव्यास्तु----तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदनाप्यत्यन्ताभावो वर्त इत्याहुः।
नन्वस्त्वभावानामधिकरणात्मकत्वं

<B1> लाघवादिति चेन्न। अन्ताधिकरणात्मकत्वकल्पनापेक्षयातिरिक्तयातिरिक्तकल्पनाया एव लघीयस्त्वात्। एवंचाधाराधेयभावोप्युपपद्यते। एवंच तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते। **दिनकरी। चतुर्थसंऽसर्गाभावे मानाभाव इत्यस्वरसः केचिदित्यनेन सूचितः। ननु मास्तु घटकाले घटात्यन्ताभावबुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशङ्क्याह---अत्रेत्यादिना। ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणेच रक्तघटे कथं रक्तो नास्ति श्यामो नास्तीतिच प्रतीतिः ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावस्यासत्वादित्यत आह--श्यामघट इति। तत्रेति। ध्वंसप्रागभावयोरित्यर्थः। अत्यन्ताभावेन सहेति शेषः। तथाच नव्यमते पूर्वपक्षिकथितशङ्कायामिष्टापत्तिरेवेति भावः। युक्तं चैतत्। कथमन्यथा पूर्वऽमग्रेपि रक्ते मध्ये श्यामे च घटे रक्तं रूपं नास्तीत्याकारकप्रत्ययस्तस्य सामान्याभावावगाहित्वात्, नचेदृशप्रत्ययो रक्तिमध्वंसाद्यवगाही**

पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेपि तादृशाकारप्रत्ययप्रसङ्गादिति। <B1> **अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात्प्रत्यक्षत्वं न स्यात्। एतेन ज्ञान१विशेषकाल२विशेषाद्यात्मकत्वमभावस्येति प्रत्युक्तं, अप्रत्यक्षत्वाप्तेः।। १२ ।।**

<B1> सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते।। १३ ।। **इदानीं पदा१र्थानां साधर्म्यं वैध्यर्म्यं च वक्तुं प्रक्रमते---सप्तानामिति। समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः। एवं विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोर्थः। ज्ञेयत्वंज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात्। एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम्।। १३।।**

<B1> द्रव्यादयः पञ्च भावा अनेके समवायिनः।। **द्रव्यापद इति।। द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च। यद्यप्यनेकत्वमभावेप्यस्ति तथाप्य१नेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्। तथाचानेकभाववृत्तिपदार्थविभाजकोपाधिमत्वमिति फलितोर्थः।** <B1> **सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः।। १४ ।।** तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः। समवायित्वं च समवायसंबन्धेन संबन्धि१त्वं नतु समवा२यवत्वं सामान्यादावभावात्।। सत्तावन्त इति।। द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः।। गुणादिरिति।। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं

<B1> क्रियाशून्यत्वं च गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः। नहि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति कर्मव१दवृत्ति वा किंतु गुणत्वादिकं तथा, आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः।। १४।।

<B1> सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः। **पारिमाण्डड्डुत्व्;ल्यभिन्नानां कारणत्वमुदाहृतम्।। १५।।** सामान्येति। सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः।। पारिमाण्डड्डुत्व्;ल्येति।। पारिमाण्डड्डुत्व्;ल्यमणुपरिमाणं। कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं तु न कस्यापि कारणं। तद्धि १स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्। तच्च न सम्भवति। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्। महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः। इद२मपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्। ज्ञायमानं सामान्यं न ३प्रत्यासत्तिः।

<B1> ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न, ज्ञानातिरिक्तं प्रत्येंवाकारणताया आचार्यैरुक्तत्वात्।। १५।। ननु कारणत्वं किमत आह---अन्यथासिद्धीति।।

<B1> अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता। **कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्।। १६।।** तस्य कारणत्वस्य।। १६।। १७।। तत्रेति। समवायिकारणे प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः।

<B1> अत्र यद्यपि १तुरीतन्तुसंयोगे पटासमवायिकरणत्वं **<B1>** णत्वं स्यात् वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात् एवं ज्ञानादीनामपीच्छाद्यसमवायिकारणत्वं स्यात् तथापि तटासमवायिकारणलक्षणे

<B1> समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्। **एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्।। १७।।** तुरीतन्तुसंयोगभिन्नत्वं देयम्, १तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्। आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन२तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे प्रत्यासन्नं द्विविधं

कार्यैकार्थप्रत्यासत्त्या३ कारणैकार्थप्रत्यासत्त्या च, ४आद्यं यथा घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणं ५तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, ६द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं

<B1> स्वगतरूपादिकं प्रति समवायिकारणं घटस्तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति तथा च क्वचित्समवायसंबन्धेन क्वचित्स्वसमवायिसमवेतत्वसंबन्धेनेति फलितोर्थः। इत्थंच कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे

<B1> प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसितम्। आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारयत्समवेतं

<B1> कार्यं भवति ज्ञेयं तु समवायिजनकं तत्। तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्।। १८।। येन सह पर्वभावः कारणमादाय वा यस्य। **अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्।। १९।। णमित्यर्थः।। १८।। इदानीमन्यथासिद्धत्वमेव कियतां तदाह----येनेति। यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डड्डत्ध्;त्वमिति। द्वितीयमन्यथासिद्धमाह---कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किं तु कारणमादायैवान्वयव्यतिरेकौ**

<B1> गृह्येते तदन्यथासिद्धम्। यथा दण्डड्डत्ध्;रूपम्। तृतीयमाह---अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा घटादिकं प्रत्याकाशस्य। तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्तद्धि शब्दसमवायिकारणत्वं। एवं च तस्य शब्दं प्रति कारणत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्। ननु शब्दाश्रयत्वेन तस्य

<B1> कारणत्वे कान्यथासिद्धिरिति चेत् पञ्चमीति गृहाण। नन्वाजनकं

<B1> प्रति पूर्ववृततितामपरिज्ञाय न यस्य गृह्यते। **काशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्, कवत्त्वादिकं विशेष१पदार्थो वेति। चतुर्थमन्यथासिद्धमाह---जनकं प्रतीति। यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा कुलालपितुर्घटं प्रति, तस्य हि कुलालपितृत्वेन**

<B1> अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्ववर्तिनः।। २०।। घटं प्रति जनकत्वेऽन्यथासिद्धिः कुलालत्वेन रूपेण जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात्। पञ्चममन्यथासिद्धमाह---अतिरिक्तमिति। अवश्यक्लृप्तनियतपूर्ववर्तिन

<B1> एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः। १अतएव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धम्। तत्र२ हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम्। नच वैपरीत्ये किं विनिगमकमिति वाच्यम्। महत्त्वत्वाजातेः कारमतावच्छेदकत्वे लाघवात्। रासभादिरिति। यद्भटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तत्रापि तद्भटजातीयं प्रति सिद्धकारणभावैर्दण्डड्डत्ध्;आदिभिरेव तद्व्यक्तेरपि संभवे रासभोऽन्यथासिद्ध **एते पञ्चान्यथासिद्धा दण्डड्डत्ध्;त्वादिकमादिमम्।** घटादौ दण्डड्डत्ध्;रूपादि द्वितीयमपि दर्शितम्।। २१।।

<B1> तृतीयं तु भवेद्व्योम कुलालजनकोपरः। **पञ्चमो रासभादि स्याद् एतेष्वावश्यकस्त्वसौ।। २२।।** इति भावः। एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात्। तथाहि दण्डड्डत्ध्;आदिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डड्डत्ध्;त्वादिकमन्यथासिद्धम्। नच वैपरी१त्ये किं विनिगमकमिति वाच्यम्। दण्डड्डत्ध्;त्वस्य कारणत्वे दण्डड्डत्ध्;घटितायाः परम्प२रायाः संबन्धत्वकल्पने

<B1> समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्। **गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं संभवति।। १९।। २०।। २१।। २२।। समवायीति।। स्पष्टम्।।**

<B1> गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्।। २३।। गुणेति।। असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम्। अथ वाऽसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थस्तेन ज्ञानादीनामसमवाकारणवृत्तिसत्ताभिन्नजातिमत्तवं तदर्थस्तेन ज्ञानादीनामसमवा- **अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।** यिकारणत्वविरहेपि नाव्याप्तिः।। २३।। अन्यत्रेति।।

<B1> परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं तु समवायादिसंबन्धेन वृत्तिमत्त्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः।। इदानीं द्रव्यस्यैव **क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता।। २५।।** क्षितिर्जलं तथा तेजः पवनो मन एव च। **परापरत्वमूर्तत्वक्रियावेगाश्रया अमी।। २५।।** विशिष्य साधर्म्यं वक्तुमारभते---क्षित्यादीनामिति।।

<B1> स्पष्टम्।। २४।। क्षितिरिति।। पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं वेगवत्त्वं कर्मवत्त्वं च साधर्म्यम्। नच यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्। परत्वादिसमानाधि१करणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्ः। मूर्तत्वमपकृष्टपरिमाणवत्त्वम् तच्चैषामेव गगनादिपरिमाणस्य कुतोप्यपकृष्टत्वाभावात्। पूर्ववत्कर्मवत्त्वं

<B1> कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं। वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्ववयाप्यजातमत्तवं च बोध्यम् ।।२५।। कालेति।। **कालखात्मदिशां सर्वगतत्वं परमं महत्।** क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि।। २६।। **कालाकाशात्मदिशां सर्वगतत्वं, सर्गतत्वं सर्मूतसंयोगित्वं,**

<B1> परममहत्त्वं च। परमहत्त्वत्वं जातविशेषः अपकर्षानाश्रयपरिमाणवत्त्वं वा।। क्षित्यदीति।। पृथिव्यप्तेजोवाय्वकाशानां भूतत्वम्। तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्। अत्र

<B1> ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम्। तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वत्यात्मनि **द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरीणाम्।** नातिव्याप्तिः। नवा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्यापि स्वरूपयोग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षत्वम्। अथवाऽऽत्मावृत्तिविशेषगुणवत्त्वम्।।

<B1> चत्वारीति। पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम्।। २६।। द्रव्यारम्भ इति। पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम्। नच द्रव्यानारम्भके घटादावव्याप्तिः। १द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।। अथाकाशेति।। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः।

<B1> आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः। यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात्प्रथमशब्दस्य

<B1> अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते।। २७।। **द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि ज्ञानादिकं यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थंचाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिर्विशेषगुणो।ःस्तीत्यतोऽव्याप्यवृत्तीत्युक्तम्। पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीति विशेगुणेत्युक्तम्।**

<B1> नच रूपादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम्। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तते इति तद्व्यदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाज्ज्ञानतवस्य तद्वृत्तित्वाज्जन्येत्युक्तम्। यद्याकाशजीवात्मनोः साधर्म्यं

<B1> रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः। **तदा जन्येति न देयं द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनां नाशाभ्युपगमाद् द्वित्वादीनामपि तथात्वात्तद्वारणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वक्तव्यम्। इच्छात्वादिकमादायात्मनि लक्षणसमन्वयः।। २७।। रूपद्रवत्वेति। पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवढद्धठ्ठड़१४;नेरूष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम्। तत्रापि तेज१स्त्वादिना रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोबागानामपि**

<B1> पृथिवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्तवमव्याप्तमिति वाच्यम्। द्रव१त्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः। न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तं, अतिव्याप्तं च रूपादाविति वाच्यम्। चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजतिमत्त्वस्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवरणआय चाक्षुषेति। गुरुणी इति। गुरुत्ववत्त्वं रसवत्त्वं च पृथ्वीजलयोरित्यर्थः। नच घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसदिमत्त्वे किंमानमिति वाच्यं। तत्रापि पृथ्वीत्वादिना तदनुमानात्। द्वयोरिति। पृथिवीतेजसोरित्यर्थः। नच नैमित्तिकं द्रवत्वं घटादौ वढद्धठ्ठड़१४;न्यादौ चाव्याप्तमिति वाच्यम्।

<B1> गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः।। २८।। **आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।** यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्।। २९।। **स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः।** नैमित्ति१कद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।। २८।। आत्मान इति। पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति। ज्ञेयत्वादिकं विहायेति बोध्यम्। तत्तु न कस्यापि वैधर्म्यं केवलान्वयित्वात्।। २९।। स्पर्शादय इति। ते च खे आकाशे

<B1> स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः।। ३०।। **स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकम्।** रूपं रसस्तथा स्नेहो वारिण्येति चतुर्दश।। ३१।। **स्नेहहीना गन्धयुता क्षितावेते चतुर्दश।** बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा।। ३२।। **धर्माधर्मौ गुणा एत आत्मनः स्युश्चतुर्दश।** संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे।। ३३।। **संख्यादिपञ्चकं बुद्धिरिच्छा यत्नेपि चेश्वरे।** परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे।। ३४।।

<B1> ।। ३०।। ३१।। ३२।। ३३।। ३४।। साधर्म्यवैधर्म्ये निरू१प्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति--- तत्रेति।।

<B1> तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता। **षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः।। ३५।।** गन्धहेतुरिति। गन्धसमवायिकारणमित्यर्थः। यद्यपि गन्धवत्त्वमात्रं पृथिव्या लक्षणमुचतितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारमत्वमुपन्यस्तम्। तथाहि पृथिवीत्वं

<B1> हि गन्धसमवायिकारणतावच्छेद१कतया सिध्यति अन्यथा

<B1> गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः। न च पाषणादौ गन्धाभावाद् गन्धवत्त्वमव्याप्तमिति वाच्यम्। तत्रापि

गन्धसत्त्वात्

<B1> अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते। भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं

<B1> तत्तदुपादानोपादेयमिति व्याप्तेः। दृष्टं चैतत् खण्डड्डत्ध्पटे महापटध्वंसजन्ये।

<B1> इत्थंच पाषाणपरमाणोः पृथीवीत्वात्तज्जन्यपाषाणस्यापि पृथिवीत्वं तथाच तस्यापि गन्धवत्त्वे बाधका भावः। नानेति। शुक्लनीलादिभेदेन नानाजातीयं रूपं

<B1> पृथिव्यामेव वर्तते, न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्, पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवसेन नानारूपसंभवात् न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्। रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात्। वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात् न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः।। षड्विध इति।। मधुरादिभेदेन यः षड्विधरसः स पृथिव्यामेव। जले मधुर एव रसः। अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः। द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगन्धवत्त्वं

<B1> स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः। **नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ३६** लक्षणं द्विविधत्वस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन बोध्यम्।। ३५।। स्पर्श इति। तस्याः पृथिव्याः। अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोनुष्णाशीत इति ज्ञापनार्थं तदुक्तं पाकजस्पर्शवत्त्वमात्रं तु लक्षणं अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।

<B1> अनित्या तु तदन्या स्यात् सैवावयवयोगिनी। **सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा।। ३७।।** नित्येति। सा पृथिवी द्विविधा नित्यानित्या चेत्यर्थः। अणुलक्षणा परमाणुरूपा पृथिवी नित्या।। ३६।। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाप्यनित्येत्यर्थः।

<B1> प्रत्यक्षत्वात्। नच तदा१नीं दृश्यपरमाणुपुञ्जस्य उत्पन्नत्वान्न प्रत्यक्षत्वेऽपि विरोध इति वाच्यम्। अदृश्यस्य दृश्यानुपदानत्वात् अन्यथा चक्षुरूष्मादिसन्ततेः कदाचिद्वृश्यत्वप्रसङ्गात्। नचातितप्रतैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्। तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यं। यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे किं तु महत्त्वोद्भूतरूपादिकारणसमुदायवतो

<B1> दृश्यत्वम् तदभावे चादृश्यत्वम्। तथाच त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्। नहि त्वन्मतेऽपि संभवतीदं परमाणौ महत्त्वाभावात्। इत्थं चावयविशिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषां चावयवधाराया

<B1> अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेतकर्योत्पत्तिप्रसङ्गात्तस्य नित्यत्वम्।

<B1> महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः। नच त्रसरेणावेव विश्रामोस्त्विति वाच्यं। त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात्कपालवदित्यनुमानेन तदवयवसिद्धेः। नचेदमप्रयोजकं,

अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात्। नचैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यं। अन्वस्थाभयेन तदसिद्धेरिति। सा चेति। सा कार्यरूपा पृथिवी

<B1> योनिजादिर्भवेद्देह इन्दियं घ्राणलक्षणम्। **विषयो द्व्यणुकादिश्च ब्रह्माण्डड्डुत्थ्ःान्त उदाहृतः ।। ३८।।** त्रिविधा। शरीरेन्द्रियविषयभेदादित्यर्थः।। ३७।। तत्र देहमुदाहरति

<B1> योनिजादीति। योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधं जरायुजमण्डड्डुत्थ्ःजं चेति। जरायुजं मानुषादीनाम्। अण्डड्डुत्थ्ःजं सर्पादीनाम्। अयोनिजं स्वेदजोद्भिज्जादिकम्। स्वेदजाः कृमिदंशाद्याः। उद्भिज्जास्तरुगुल्माद्याः। नारकिणां शरीरमप्ययोनिजम्। नच मानुषादिशरीराणां पार्थी◌िवत्वे किं मानमिति वाच्यम्। गन्धादिमत्त्वस्यैव प्रमाणत्वात्।

<B1> नच क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्। तथा सति जलत्वपृथिवीत्वादिना संकरप्रसङ्गात्। नच तर्हि जलीयत्वादिकमेवास्तु नतु पार्थिवत्वमिति वाच्यम्। क्लेदादीनां विनाशेपि शरीरत्वेन प्रत्यभिज्ञानाद्गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः तेन पार◌ार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्। शरीरत्वं न जातिः पृथिवीत्वादिना साङ्कर्यात्। किंतु चेष्टाश्रयत्वं, वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः।

<B1> नच वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्। आध्यात्मिकवायुसंबन्धस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेत्, भग्नक्षतसंरोहणादिना तदुन्नयनात्। यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवित्वेन विशेषणीयम्। नच यत्र शरीरे चेष्टान न जाता तत्राव्याप्तिरिति वाच्यम्। तादृशे प्रमाणाभावात्। अथवा
चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं

<B1> अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्। मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र नसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम्। कल्पभेदेन नृसिंहशरीरस्य

<B1> नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इन्द्रियमिति। घ्राणेन्दियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेदित्थम्। घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैवाभिव्याञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्। न च दृष्टान्ते स्वीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं। परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्। न च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्।

<B1> तस्य सक्तुसाभिव्यञ्जकत्वात्। यद्वा परकीयेति न देयम्, वायूपनीतसुरभिभागानां दृष्टान्तत्वसंभवात्। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम्। द्रव्यत्वे सतीति विशेषणात्। विषयमाह---विषय इति। उपभोगसाधनं विषयः। सर◌्वमेव

<B1> कार्यजातमदृष्टाधीनम्। यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षातपरम्परया वा जनयत्येव। नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्तितेन द्व्यणुकादिब्रह्माण्डड्डुत्थ्ःान्तं सर्वमेव

<B1> वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ। **स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्।। ३९।।** विषयो भवति। शरीरेन्द्रिययोर्विषयत्वेपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः।। ३८।। जलं निरूपयति--वर्णः शुक्ल इति। स्नेहसमवायिकारणतवच्छेदकतया जलत्वजातिसिद्धिः।

<B1> यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न।

जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया

<B1> जलत्वजातिसिद्धिः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति। नतु शुक्लरूपवत्त्वं लक्षणम्। अथवा

<B1> नैमित्तिकद्रवत्ववदवृत्तिरूपद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्।
अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। रसस्पर्शाविति। जलस्य मधुर एव रसः। सीत एव स्पर्शः। तिक्तावृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। ननु शुक्लरूपमेवेति कुतः

<B1> कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न। नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासंभवात् कालिन्दीजले नीलत्वप्रतीतस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपि घवलिमोपलब्धिः। अथ जले माधुर्ये किं मानम्, नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते नच नारिके लजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तस्याश्रयौपाधिकत्वात् अन्यथा जम्बीरजलादावाम्लादिरसोपलब्धेराम्लादिमत्त्वमपि स्यादिति चेन्न।
हरीतक्यादभक्षणस्य जलरसव्यञ्जकत्वात्।

<B1> नच हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम्। कल्पनागौरवात्।
पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकम्। जम्बीररसादौ

<B1> त्वाश्रयौपाधिकी तथाप्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं जलत्वं

<B1> बोध्यम्। घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव। तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभवात्। स्नेहस्तत्रेति। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात्। तेन जलएव स्नेह इति मन्तव्यम्।द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमपि